**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 4, Issue - 10, Oct - 2021
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Received on : 29/09/2021 Accepted on : 11/10/2021 Publication Date: 31/10/2021

# भक्तेः अमृतत्त्वप्राप्तिः

**[1]Dayambar Sabar, [2]Dr. J. Krishnan,**
[1]Reserach Scholar, Department of Sanskrit, Pondicherry University, Pondicherry, India
[2]Professor, Department of Sanskrit, Pondicherry University, Pondicherry, India
Email – [1]dayambarsans11@gmail.com, [2]jkrishnan63@yahoo.co.in

***Abstract:*** परमेश्वरसाक्षात्कार एव मानवजीवनस्य चरमं लक्ष्यं भवति। सः एष परमपुरुषः सर्वेषामस्माकं हृदये सम्प्रतिष्ठितः अत्यन्तमन्तिके वर्तते। स एवास्माकमन्तर्यामी परमात्मा। स किल अस्मासु विद्यमानाहङ्कार ममकारादीन्द्वेष्टि। स्वभक्तेषु विनयदैन्यादीनभीप्सति। स भगवानित्यभिधियते। भक्ताः प्रेमार्द्रहृदयास्सन्तः भगवद्गुणश्रवणकीर्तनभजनादीन् विदास्यन्ति स तत्सर्वमङ्गीकृत्य तेषाम्पुरतो आविर्भूयानुगृह्णाति। यतो हि सः कृपामयः। स यदा प्रत्यक्षीक्रियते सर्वमस्माकं जीवितं सम्पन्नं भवति ।

***Key Words:*** भक्तिरसः, भक्तिः, अमृतत्त्वप्राप्तिः, भक्तिमार्गः, श्रीमद्भागवतम् ।

## 1. प्रस्थावनाः

विद्वांसः कथयति यत् सत्-चित्-आनन्दरूपश्रीभगवान् अमृतस्वरूपमपि च भगवत्भक्त्यपि अमृतमयम्। तदा साधकः भक्तियुक्तः भूत्वा स्वहृदयनाथेन सह मिलितः भवति तदा साधकोऽपि अमृतस्वरूपः भवति एव। जीवस्य यावत्पर्यन्तं वहिर्दृष्टिमस्ति तावत् पर्यन्तं सः विभिन्नविषयेऽशक्तः भूत्वा विभिन्नसंस्कारसहितं भिन्ने भिन्ने योनिमध्ये परिभ्रमणं करोति। तथा च जीवस्य अयं वहिर्दृष्टिः तस्य जन्म-मृत्यु-संयोग-वियोगादि-त्रिपापस्य कारणम्। नानारूपधारिणी माया परिवर्तनशीला भवति। परन्तु सच्चिदानन्दरूपश्रीभगवान् स्वयं प्रकाशकः, स्वयमेवानन्दस्वरूपम् तथा च भूत-भविष्यत्-वर्तमानकालेऽपि सदा अपरिवर्तनशीलः भवति। यावत्पर्यन्तं जीवः मायायः लीलाभूमिसंसारे विद्यते तावत् पर्यन्तं सः नानाप्रकारकं दुःखभोगं कृत्वा जन्म-मृत्युरूपमार्गे चक्रवत् आवर्तितं भवति। परन्तु यदा भगवत्कृपावशात् तस्य हृदयं भगवत्भक्तियुक्तं भवति तदा तस्य मनसः गतिः संसारात् निगृहीतं भूत्वा श्रीभगवतः समीपे समर्पितं भवति। तदा सः मायाचक्रात् मुक्तः भूत्वा अमृतस्वरूपं भवति। अहंकारवशात् जीवः विषयाऽसक्तं भूत्वा संसारचक्रे आवर्तनं करोति, परन्तु यदा परावैराग्येन जीवस्य तद् बन्धनं शिथिलं भूत्वा जीवस्य मुखं संसारात् निगृहीतं भवति, तदा स वन्धनमुक्तं भवितुं शक्यते। सर्वाभौममतयुक्तयोगदर्शनप्रणेता महर्षि पतञ्जलिना योगदर्शने "ईश्वरप्रणिधानाद्वा" इति सूत्रेण दर्शितवान् यत्, ईश्वरभक्तिद्वारा अतिशीघ्रमेव जीवस्य मुक्तिः भवति। अत्रामृतशब्दः मुक्तिवाचकः अर्थात् अमरत्त्वं प्राप्ते सति यथा पुनर्मृत्युः नैव भवति, अनेन प्रकारेण जीवः मुक्तिः प्राप्ते सति जन्म-मृत्युरूपं बन्धनछिन्नं भवति। साधकस्य हृयते भक्तेः पूर्णविकाशे सति सः साधकः ईश्वरं प्रियतमं मत्वा तस्य ईश्वरस्य प्रेमे निमग्नं भूत्वा स्वस्य सर्वाहंकारसम्बन्धीयपुरुषार्थं त्याजति।

अस्मिन् संसारे यत्किञ्चित् अस्ति तत् सर्वं परमेश्वरं भवति, यत् किमपि करोति तत्सर्वं परमेश्वरः एव सम्पादयति, अनेन प्रकारेण जीवस्य अनन्यभक्तिः उदिते सति यदा स्वयमेव विस्मरति तदा तस्य हृदयस्य अहंतत्त्वोऽपि दूरीभूतं जायते किञ्च अहंतत्त्व एव जीवस्य बन्धनस्य कारणम्। अस्य कारणस्य अहंतत्त्वस्य विनाशद्वारा जीवः मुक्तः भवति। भक्तेः उन्नतिना सह संसारसम्बन्धः अर्थात् विषयानुरागं शिथिलता प्राप्यते। यतः भक्तः तदा ईश्वरप्रेमकारणात् ईश्वरं विहाय अन्यत् कस्मिन्नपि विषये मनोनिवेशनं न करोति। अपि च विषयवस्तुनः अत्याधिकविमुखता एव परावैराग्यम्। अस्मात् कारणात् भक्तेः प्रभाववशतः परावैराग्यस्य उदये सति स्वतः एव अहंतत्त्वस्य विनाशस्य समये संसारसम्बन्धस्यापि नाशं भूत्वा जीवः मुक्तिपथस्याधिकारी भवति। भक्तिना यदा जीवस्य चित्तसमुद्रे वारिविन्दुः इव ईश्वरे मेलनं भवति, तदा सः भक्तः त्रितापतापितजीवः त्रितापात् मुक्तः अमृतपदं प्राप्नोति। भक्तिः एव मुक्तिप्राप्तेः साक्षात्कारणम्। भक्तिः एव अमृतरूपम् अर्थात् मुक्तिरूपम्।

भक्तिमार्ग एव सर्वमार्गेषु सुगमः, भक्तिसाधनमेव अपरेषु साधनेषु सुलभम्, यतो हि ईश्वरभक्तेः साधने विद्यासंग्रहस्यावश्यकता नास्ति तथा धनव्ययस्य प्रयोजनमपि नास्ति, आचारविचारस्य मर्यादा नास्ति, वर्णाश्रमस्य परिपाटी नास्ति, योगाभ्यासस्य कठिनता नास्ति, व्रत-तपस्यायाः कठिनतापि नास्ति। तस्मादेव कारणात् आचार्य्याः "ओं अन्यस्मात्सौलभ्यं भक्तौ" इति। कथनेन भक्तिमार्गं सर्वेषु मार्गेषु सुलभरूपेण प्रतिपादितवन्तः। यदि परमेश्वरस्य कृपावशतः साधकः भक्तेः अधिकारी भवितुं शक्नोति तर्हि साधनस्य सम्पूर्णः वक्रमार्गः दूरीभवति। तथा च सः सौभाग्यवान् साधकः सर्वान् वक्रमार्गान् अतिक्रम्य शीघ्रमेव स्वलक्ष्यस्थले गन्तुं शक्नोति। भक्तेः उदयं कथं भवति इत्यस्मिन् विषये कोऽपि न जानाति परन्तु भक्तिमान् साधकः वदति यत् केवलं भगवत्सेवामाध्यमेनैव भक्तिप्राप्तिः भवितुं शक्यते। यथा अतीव प्रभावशाली मार्तण्डः स्वस्य किरणशक्तिद्वारा पृथिवीतः जलांशं वाष्पे

परिणतं कृत्वा आकाशे आकर्षणं कृत्वा स्वयमेवादर्शनं कृत्वा पृथिवीं पूर्णतया अन्धकारमयं करोति। पुनः स्वस्य तेजोमयशक्तिना एव उष्णतावृद्धिं कृत्वा तं वाष्परूपीमेघं तृष्टिजले परिणतं कृत्वा स्वयमेव तमोमुक्तो करोति। ततः पृथिवी पुनः पूर्वरूपेण प्रकाशिता भवति। तथैव श्रीभगवान् स्वस्य अलौकिकक्रियया जीवान् मायामोहितं कृत्वा विभिन्नेषु क्रीडासु प्रयोजयति। पुनः जीवनामुपरि कृपावशतः भक्तिवारिसिञ्चनेन तान् पवित्रं कृत्वा स्वक्रोडे उत्थाप्य स्वस्य मध्ये लीनं करोति, तस्मात् ईश्वरकृपा एव भक्तेः एकमात्र कारणात् इति सिद्धान्तः।

**उपसंहार :**

भूत-भविष्यत्-वर्तमानेषु सदा विद्यमान-सत्यस्वरूप-श्रीभगवतः भक्ति एव सर्वश्रेष्ठः। अस्मादेव कारणात् त्रिकालदर्शी परमभक्तः महर्षिनारदः उच्चस्वरेण उद्धवाहुः "ओं त्रिसत्यस्यभक्तिरेवगरीयसी भक्तिरेवगरीयसी" इति। अर्थात् भक्तिः एव सर्वश्रेष्ठः ।

**सहायकग्रन्थसूची** :–

1. सरस्वती, स्वामी अभयानन्द(२०११), शाण्डिल्यभक्तिसूत्रम्, श्री शौनक सुधा प्रकाशक समिति, लखनऊ.
2. पाण्डेय, श्री जनार्दन शास्त्री(२०१५) श्री भगवद्भक्तिरसायन, चौखम्बा विद्याभवन, वाराणासी.
3. सरस्वती, स्वामी अखण्डानन्द(१९८७), भक्तिरहस्य, चन्द्र प्रिंटिंग प्रेस कालबादेवी, बम्बई.
4. स्वामी, ए.सी. भक्तिवेदान्त(१९८९), भक्तिरसामृतसिन्धु, भक्तिवेदान्त बुकट्रस्ट, बम्बई.
5. श्री विष्णुपुरी(१८९०), भक्तिरत्नावली, वाराणसेय संस्कृतविश्वविद्यालयः, वाराणसी.